**SET - 01**

**Roll No.** | | | | | | |

Candidates must write the Set No on the title page of the answer book.

# SAHODAYA PRE BOARD EXAMINATION – 2024-25

## CLASS – X

## Sub.: COMMUNICATIVE SANSKRIT (119)

## MARKING SCHEME

**Time Allowed: 3 hours** **Maximum Marks: 80**

**समयः - होरात्रयम्** **पूर्णाङ्काः - 80**

**अवधातव्यम् –**

1. अङ्कयोजनायां प्रदत्तानि उत्तराणि निर्देशात्मकानि सन्ति । प्रदत्तानि उत्तराणि अतिरिच्यापि सन्दर्भानुसारम् अन्यानि उत्तराणि भवितुम् अर्हन्ति ।
2. **आन्तरिकविकल्पात्मकेषु प्रश्नेषु यद्यपि स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकम् उत्तरं दातव्यं तथापि यदि छात्रः अतिरिक्त-प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय निर्णयः कर्त्तव्यः** । यथा चित्रवर्णने पञ्चवाक्यानां लेखनम् अभीष्टं परं छात्रः यदि सप्तवाक्यानि लिखति तर्हि तत्र केवलं प्रथम-पञ्चवाक्यानां न अपितु यानि वाक्यानि उत्तमानि सन्ति तेषां मूल्याङ्कनं करणीयम् ।
3. गद्यांशे श्लोके नाट्यांशे वा पृष्टाः प्रश्नाः अवबोधात्मकाः सन्ति । अतः विद्यार्थिनः एतेषु प्रदत्तशब्दानां स्थाने समभाव-पर्यायवाची-शब्दानां प्रयोगं कर्तुं शक्नुवन्ति । तदर्थम् अङ्काः देयाः । यदि विद्यार्थिनः उत्तरलेखन – समये समुचितानां विभक्तीनां वचनानां च प्रयोगं न कुर्वन्ति तर्हि अंशतः अङ्काः कर्तनीयाः न तु पूर्णाङ्काः ।
4. त्रुटिपूर्णवर्तन्यै व्याकरणात्मक-प्रयोगाय च अनुपाततः अङ्काः कर्तनीयाः न तु सम्पूर्णाङ्काः ।
5. आंशिक-दृष्ट्या समुचितेभ्यः उत्तरेभ्यः अपि अङ्काः देयाः ।
6. रचनात्मक-कार्ये वाक्यरचना प्रमुखा न तु वाक्यसौन्दर्य-तत्त्वम् । अतः आंशिकवाक्यशुद्धये अपि अङ्काः देयाः ।

| Sl. | ‘क’ भाग: अपठितावबोधनम् | MARKS |
|---|---|---|
| 1 | **अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नाम् उत्तराणि संस्कृतेन लिखत-**<br>**अ. एकपदेन उत्तरत -(केवलं प्रश्नद्वयम्)**<br>(i) मानवमनस:<br>(ii) हिंसाया:<br>(iii) ज्ञानज्योति:<br>**आ. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)**<br>(i) भारतीय-संस्कृतौ आत्मत्यागस्य भावना समाहिता ।<br>(ii) भारतीयानां धर्मविषये एतादृशा: विचारा: सन्ति यत् जगत: सर्वे धर्मा: मोक्षप्रदायका: सन्ति । सर्वे धर्मा: अन्तत: एकमेव लक्ष्यं प्रति गच्छन्ति ।<br>(iii) भारतीयसंस्कृते: परधर्मसहिष्णुता, आत्मशुद्धि: नारीसम्मानं च विशेषता: सन्ति ।<br>**इ. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकम् संस्कृतेन लिखत।**<br>‘भारतीय संस्कृति:’ अथवा ‘भारतीयसंस्कृते: विशेषता’ । छात्रस्य उत्तरं दृष्ट्वा छात्रहिताय समुचित: निर्णय: करणीय: ।<br>**ई. यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)**<br>(i) (ख) धर्मा:<br>(ii) (ग) अमूल्या<br>(iii) (ग) कल्पते<br>(iv) (ख) उपकारं | **1x 2=2**<br><br><br><br><br>**2x 2=4**<br><br><br><br><br>**1**<br><br>**1x 3=3** |
| | **‘ख’ भाग: (रचानात्मककार्यम्) (15 अङ्का:)** | |
| 2 | **भवान् सुमित:। योगस्य महत्त्वं वर्णयन् स्वमित्रम् अमितं प्रति पत्रं मञ्जूषात: पदानां सहायतया पूरयित्वा लिखत-** परीक्षाभवनम्<br>प्रियमित्र अमित! दिनाङ्क:___<br>नमोनम: ।<br>अत्र कुशलं तत्रास्तु । मम पित्रा योगदिवसे **(i) योगस्य** प्रचारार्थं स्वक्षेत्रे योगशिविरस्य आयोजनं कृतम् । तस्मिन् **(ii) कार्यक्रमे** योगविद्यायां कुशला: अनेके **(iii) जना:** आगत्य स्वविचारान् प्रकटितवन्त: । एवं ते **(iv) जनान्** योगस्य जीवने स्वीकारार्थं **(v) प्रेरितवन्त:** । योगेन किं किं **(vi) सिध्यति** किं किं च प्राप्यते इति अपि **(vii) तै:** स्पष्टीकृतम् । तेषाम् उद्बोधकानां विचाराणाम् ईदृश: **(viii) प्रभाव:** जात: येन ये अपि जना: तत्र **(ix) आगता:** ते योगप्रक्रियां जीवने धारणार्थं **(x) प्रतिज्ञाम्** अकुर्वन् । यदि भवान् अपि अत्र स्यात् स्वयम् एव तत् पश्येत् । अस्तु! शेषं सर्वं कुशलम् ।<br>भवत: मित्रम्<br>सुमित: | **1/2x 10 = 5** |

| | | |
|---|---|---|
| **3** | **चित्रवर्णनम्**<br>अत्र छात्रेभ्य: संक्षिप्तवाक्यरचना अपेक्षिता वर्तते । केवलं वाक्यशुद्धि: द्रष्टव्या । **अस्य प्रश्नस्य प्रमुखम् उद्येश्यं वाक्यरचना अस्ति** । वाक्यं दीर्घम् अस्ति अथवा लघु इति महत्त्वपूर्णं नास्ति । प्रतिवाक्यम् अर्ध: अङ्क: भावस्य कृते अर्ध: अङ्क: च व्याकरणदृष्ट्या शुद्धतानिमित्तं निर्धारित: अस्ति । मञ्जूषायां प्रदत्ता: शब्दा: सहायतार्थं सन्ति । छात्र: तेषां वाक्येषु प्रयोगं कुर्यादेव इति अनिवार्यं नास्ति । छात्र: स्वमेधया अपि वाक्यानि निर्मातुं शक्नोति । मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्त्तनं कृत्वा अपि वाक्यनिर्माणं कर्त्तुं शक्यते ।<br>**अथवा**<br>**अनुच्छेदलेखनम्**<br>अयं विकल्प: सर्वेभ्य: अस्ति । छात्रा: मञ्जूषायां प्रदत्तानां शब्दानां विभक्तिं परिवर्त्तनं कृत्वा अपि वाक्यनिर्माणं कर्त्तुं शक्नुवन्ति । अत: अङ्का: देया: । अस्य मूल्याङ्कनाय अन्ये नियमा: चित्रवर्णनस्य अनुगुणं पालनीया: । | **1x 5=5** |
| **4** | **संवादपूर्ति:**<br>प्रवीर: – श्व: अस्माकं समावर्त्तन-संस्कार: भविष्यति । न जाने कथं द्रुतगत्या वर्षाणि व्यतीतानि ।<br>अतुल: – **(i) द्वादशकक्षानन्तरं त्वं कस्मिन् क्षेत्रे भविष्यनिर्माणं करिष्यसि ?**<br>प्रवीर: – अहं तु अभियन्त्रविज्ञानं पठिष्यामि ।<br>देवेश: – मया तु चिकित्साविज्ञानं पठिष्यते ।<br>नीलिमा – **(ii) अहं वस्त्रालङ्करणविज्ञानं पठिष्यामि ।**<br>वैष्णवी – अहं 'मधुवनीचित्रकला' इत्यस्य प्रशिक्षणं प्राप्य कुटीरोद्योगं चालयिष्यामि । मह्यं चित्राङ्कनम् अतीव रोचते ।<br>अतुल: – **(iii) अहमपि कृषिविज्ञानं पठित्वा कृषिकार्यं करिष्यामि ।**<br>मण्डन: – अहो! कीदृशम आश्चर्यम्, **(iv) कक्षाया: सर्वाधिका मेधाविनी छात्रा वस्त्रालङ्करणविज्ञाने भविष्यनिर्माणं करिष्यति ?**<br>देवेश: – मण्डन! तव गणितक्षेत्रे दक्षतां दृष्ट्वा त्वयि भविष्यस्य गणितज्ञं पश्यामि अहम् । त्वं कृषिकार्यं करिष्यसि ?<br>मण्डन: – **(v) अथ किम् । वैज्ञानिकरीत्या कृषिकार्यं कृत्वा अहं देशस्य कृषिसम्पद: विकासे योगदानं करिष्यामि ।**<br>अवनीश: – सम्यक् कथितम् । अधुना तु सर्वकारेण भूमिस्वास्थ्यपत्रम् अपि प्रदीयते येन भूमिस्वास्थ्यपरीक्षणं भवति । | **1x 5=5** |

| | | |
|---|---|---|
| | सर्वे – भूमेः अपि स्वास्थ्यस्य परीक्षणम्? (हसन्ति)<br>अवनीशः – अथ किम्। भूमेः अपि स्वास्थ्यपरीक्षणं कर्तव्यम्।<br>**अथवा**<br>**कथापूर्तिः**<br>एकदा गुरुः द्रोणाचार्यः दुर्योधनम् **(i) आहूय** आदिशत् - वत्स! नगरे सर्वाधिकं गुणवन्तं जनम् अन्विष्य **(ii) आनय**। दुर्योधनः सम्पूर्ण-नगरम् **(iii) भ्रान्त्वा** आगच्छत्। सः सर्वत्र **(iv) अन्वेषणं** कृत्वा गुरोः समीपम् आगत्य अवदत्-भगवन्! **(v) नगरे** मत्तः गुणवत्तरः कोऽपि नास्ति इति। आचार्यः पुनः युधिष्ठिरम् आहूय **(vi) आदिष्टवान्**-वत्स! संसारे सर्वाधिकं गुणहीन-जनम् **(vii) अन्विष्य** आनय इति। युधिष्ठिरः आगत्य अवदत् - प्रभो! मम सदृशः गुणहीनः संसारे कोऽपि नास्ति। आचार्यः **(viii) युधिष्ठिराय** आशिषम् अयच्छत् - प्रियपुत्र! तव **(ix) कीर्तिः** संसारे कदापि न नंक्ष्यति। नूनं सत्यमेव उच्यते - यथा दृष्टिः तथा **(x) सृष्टिः**। | **1x 5=5** |

| **'ग' भाग: (अनुप्रयुक्तव्याकरणम्) (25 अङ्काः)** | | |
|---|---|---|
| **5.** | **सन्धिं सन्धिच्छेदं च - (केवलं प्रश्नचतुष्टयम्)**<br>(i) पदच्छेदः<br>(ii) गात्रेषु +अपि<br>(iii) क्रोधोऽभिजायते<br>(iv) पापतरः + ततः<br>(v) जलपानात् + अनन्तरं | **1x4=4** |
| **6.** | **समस्तपदं विग्रहं च - (केवलं प्रश्नचतुष्टयम्)**<br>(i) (क) धियः गुणाः<br>(ii) (घ) हिमाद्रितुङ्गश्रृङ्गैः<br>(iii) (घ) धर्मप्रदां<br>(iv) (क) करुणया सह<br>(v) (घ) व्यासः च नारदः च | **1x4=4** |
| **7.** | **प्रत्ययाः - (केवलं प्रश्नचतुष्टयम्)**<br>(i) (घ) मन्दभाग्या<br>(ii) (ख) ऐतिहासिकानां<br>(iii) (ग) धैर्यवान् | **1x4=4** |

| | | |
|---|---|---|
| | (iv) (ग) भवत्या:<br>(v) (क) पञ्च + त्व | |
| **8.** | **वाच्यम् (केवलं प्रश्नत्रयम्)**<br>(i) सेवकै:<br>(ii) गच्छामि<br>(iii) लिख्यते<br>(iv) पाठा: | **1x3=3** |
| **9.** | **समयः (केवलं प्रश्नत्रयम्)**<br>(i) सपाद सप्त<br>(ii) दशवादने<br>(iii) पादोन द्वादशवादने<br>(iv) सार्ध-एक / सार्धैक | **1x3=3** |
| **10.** | **अव्ययपदानि (केवलं प्रश्नचतुष्टयम्)**<br>(i) इव<br>(ii) अपि<br>(iii) नूनं<br>(iv) बहि:<br>(v) वृथा | **1x4=4** |
| **11.** | **अशुद्धसंशोधनम् (केवलं प्रश्नत्रयम्)**<br>(i) (ख) इच्छामि<br>(ii) (घ) कश्चित्<br>(iii) (ग) अनेके<br>(iv) (ख) प्रतिवसति स्म | **1x3=3** |
| **'घ' भागः (पठितावबोधनम्) (30 अङ्काः)** | | |
| **12** | **गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-**<br>**अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) कपय:<br>(ii) अर्धज्वलितकाष्ठेन<br>(iii) तृणेषु | **5**<br>**1/2x2=1** |

| | | |
|---|---|---|
| | **आ. पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) साश्रुनयनो यूथपतिः सगद्गदम् उक्तवान् – 'रसनास्वादलुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ । अहं तु वनं गच्छामि ।'<br>(ii) मेषः दाहवेदनया च भूमौ लुठति ।<br>(iii) ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्रविशति ।<br>**इ. निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) मेषः<br>(ii) अन्यस्मिन्<br>(ii) अटव्यां | **1x2=2**<br><br><br><br><br>**1x2=2** |
| **13.** | **पद्ये पठित्वा प्रदत्तप्रश्नान् उत्तराणि संस्कृतेन लिखत –**<br>**अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) सुखम्<br>(ii) सुखानि<br>(iii) साधुवृत्तिं<br>**आ. पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) पापिनां सदा दुःखं भवति ।<br>(ii) पापिनां सदा दुःखं पुण्यकर्मणां च सदा सुखम् इति स्थिरतरं जानीयात् ।<br>(iii) आत्मनः श्रेयः तथा प्रभूतानि सुखानि च इच्छन् नरः परेभ्यः अहितं न कुर्यात् ।<br>**इ. निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) श्रेयः<br>(ii) सः<br>(iii) अहितं | **5**<br>**1/2x2=1**<br><br>**1x2=2**<br><br><br><br>**1x2=2** |
| **14.** | **अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –**<br>**अ. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) सहस्रांशुः<br>(ii) उल्काः<br>(iii) द्रोणपुत्रेण<br>**आ. पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) कम्पते खलु सपर्वत-वन-द्रुमा सकला मही । | **5**<br>**1/2x2=1**<br><br>**1x2=2** |

| | | |
|---|---|---|
| | (ii) समन्तात् वर्धमाना: प्रचण्डनलशिखा: आकाशं लिहन्ति इव ।<br>(iii) त्रैलोक्यं दहन् इव प्रचण्डज्वाल: अग्नि: परित: प्रसरति ।<br>**इ. निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्)**<br>(i) मही<br>(ii) सहस्रश:<br>(iii) त्वं | **1x2=2** |
| **15.** | **प्रश्ननिर्माणं कुरुत - (केवलं पञ्चप्रश्ना:)**<br>(i) कदा<br>(ii) क:<br>(iii) कस्य<br>(iv) के<br>(v) कीदृशं<br>(vi) कासां | **1x5=5** |
| **16.** | **अन्वयपूर्ति:**<br>**अन्वय:-** एषा (i) **जगत्पते:** सृष्टि: हि (ii) **अधुना** रमणीया । (iii) **सर्वे** जीवा: अत्र (iv) **परस्परं** भावयन्त: मोदन्ताम् ।<br>**अथवा**<br>**भावार्थे रिक्तस्थानपूर्ति:-**<br>श्रीकृष्णस्य वच: श्रुत्वा पुन: धनुर्धर: अर्जुन: वदति - हे कृष्ण! इदं मन: अतीव (i)**चञ्चलम्** । इदं शरीरस्य मन्थनकर्ता, (ii) **बलवत्सु** बलवत् अपि अस्ति । अत: अहं तस्य (iii) **नियन्त्रणं** वायो: इव अतीव (iv) **कठिनं** मन्ये । | **1/2x4=2**<br><br><br><br>**1/2x4=2** |
| **17.** | **प्रसङ्गानुकूलम् उचितार्थम् - (केवलं प्रश्नचतुष्टयम्)**<br>(i) (घ) अक्षतचूर्णम्<br>(ii) (घ) रङ्गमञ्चस्य पृष्ठे<br>(iii) (क) खादति<br>(iv) (क) क्षितौ<br>(v) (ख) प्रबुद्ध: | **1x4=4** |
| **18.** | **पठितकथा-पूर्ति: -**<br>दुष्टबुद्धि: तु तस्य **(i) सद्वचनानि** तिरस्कृत्य ग्रामाभिमुखं प्राचलत् । प्रच्छन्नभाग्य: तु समुपजातविवेक: **(ii) स्वगृहं** प्रतिनिवृत्त: । गृहे तस्य **(iii) भार्या** सपदि समागतं पतिं दृष्ट्वा | **1/2x8=4** |

| | | |
|---|---|---|
| | **(iv) अपृच्छत्** आर्य! किं सर्वगतं कुशलं वर्तते? अयथाकालं समागतोऽसि? सम्प्रति धर्ममतिः सः **(v) पश्चात्तापेन** दग्धमानसः सर्वं वृत्तान्तं निवेद्य सकरुणम् **(vi) उच्चैः** अक्रन्दत् । **(vii) बुद्धिमती** सा अवदत्-अलं चिन्तया । आपदां तरणिः धैर्यम् । इदानीं विषादं त्यक्त्वा **(viii) उद्यमः** क्रियताम् । | |

◆◆◆